CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ श्रीः ❀

योगाऽभ्यासतरङ्गः



रचयिता—

सुव्वा कृष्णप्रसाद शर्म्मा

लंसालः

ासंवत्
११

सर्वाऽधिकारः
सुरक्षितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदान्त - 325

❀ ॐ ❀ मूर्ते शिवे !

समर्पणम्

इच्छा-ज्ञान-क्रियात्मिके मनुभवे सच्चित्स्वरूपे परे
नित्यानन्दरते त्रिलोकमहिते सत्यैक्यमूर्त्ते शिवे ।
सूर्येन्द्वग्निनतनो स्वनुग्रहकले निष्कर्षबोधेश्वरि
सोऽहं ते मनसाऽर्पयामि सकलं प्रज्ञानविद्यात्मिके ॥

श्रीकृष्णप्रसादशर्मणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२६६६

❀ श्रीः ❀

॥ मङ्गलाचरणम् ॥

"प्रज्ञानं ब्रह्म" विद्या त्वमसि परशिवे !"तत्त्वमस्यात्मिका" त्वं
"सोऽहं ब्रह्मास्मि" च त्वं कुलपथरसिके!"सोऽहमात्मा" त्वमेव ।
"हंसःसोऽहं" त्वमेका सुरवरमुदिते ! सच्चिदानन्दिनी त्वं
श्रीविद्ये ! नौमि पूर्वं त्रिभुवनवरदे ! षोऽशीं मङ्गलार्थम् ॥

लेखकः --

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

श्रीगणेशाय नमः

* प्रस्तावना *

नत्वा श्री गुरुपादपद्मयुगलं माङ्गल्यहेतुं परं
नित्यं नौमि गणेश्वरं गजमुखं विघ्नस्य विध्वंसकम् ।
वन्दे जाड्यभवान्धकल्मषहरां बुद्धिप्रदां शारदां
ज्योतिर्लिङ्गमयं स्वयंभुवमहं वन्दे शिवं शाश्वतम् ॥

(१)

श्रीदीनोदयसंज्ञकं स्वजनकं शश्वद्भृदा भावयन्
वन्दे पादयुगं धनञ्जयभवं पित्रे सुजन्मप्रदम् ।
योगाभ्यासतरङ्ग एष उदितो धृष्टत्वबुद्ध्या मया
वंद्वन्यानसरञ्जनं प्रकुरुतादेष स्वभावोज्ज्वलः ॥

(२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भो भो विद्वद्वराः !!

सकलजगत्कारणभूतायाः सर्वभूताऽधिवासिन्या इडापिङ्गलासुषुम्णान्तर्गतब्रह्मनाडीस्वरूपिण्याः स्वयम्भूलिङ्गवेष्टिन्या मूलाधारादिब्रह्मरन्ध्रान्तचारिण्याः कुलकुण्डल्याः स्वरूपवर्णनं श्रीमद्गुरुकृपयाल्पकालानुभवेन यल्लब्धं तदेतत्तरङ्गरूपं निर्माय भवतां दृष्टिगोचरीकर्त्तुमत्र कृतप्रयत्नोऽस्मि । क्वाऽहो कुण्डलिनीरहस्यं क्वचाऽस्माकं तत्स्वरूपवर्णनसामर्थ्यम् । विद्याविनय योगाऽनुभवादिविमुख–सकलाऽध्यात्मिकराजसयोगाचरणवञ्चित - वैभवकणिकालोलुप - स्त्रीपुत्रादिपरिवारलम्पटेन गृहस्थेन मयाल्पबुद्ध्या विरचितो "योगाभ्यासतरङ्गः" भवतामग्रे नूनमुपहासाय प्रकल्पेत । तथाऽपि कुलकुण्डलीस्वरूपस्वेष्टदेवताभक्तिप्रेरितो निजगुरुकरुणाऽऽर्द्रहृदयश्चाऽहमेतद्यथाज्ञानं प्रकटीकृतवानस्मि । अतो भवद्भिर्मदीयं दोषजातं करुणाऽऽर्द्रहृदयैः क्षन्तव्यमित्याशास्ते ।

प्रार्थयिता—

सुब्बा कृष्णप्रसाद शर्मा

लंसालः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

❀ शुभाशंसा ❀

—*—

योगीन्द्रादतकुण्डलीकमलजः सच्चित्सुखाम्भोनिधे-
र्योगाभ्यासतरङ्ग एष रुचिरः कृष्णप्रसादोदितः ।
आरोहादवरोहणावधि यथाशास्त्रं रहस्योल्लसन्
भूयादागमवेदिसज्जनमुदे कौलक्रमालङ्कृतः ॥

२०१२ साल् माघ शुक्ल पञ्चमी भैरहवा

योगिनो—
नरहरि नाथस्य
नेपाल मृगस्थलीस्थस्य

भावोद्धारः

—

विविधागमप्रकीर्णान्विषयानेकत्र संगृह्य ।
नानागमावलोकनपरिश्रमं कारयन्दूरम् ॥

(१)

साङ्गोपाङ्गक्रमतः प्रवर्ण्य चक्राणि सर्वाणि ।
कुलकुण्डलिन्युपास्ति प्रकारमादर्शयन्सम्यक् ॥

(२)

सारार्थतोऽल्पकालात्कौलिकयोगावबोधनेच्छूनाम् ।
साधनकौतूहलिनां सुधियामुपकारमाचरन्प्रणयात् ॥

(३)

योगाभ्यासतरङ्गो हंससमूहान्तरङ्गमोदकरः ।
शान्ते यदीयमानसरोवरे निर्मले समुद्भूतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४)

साऽयमिहाऽऽद्रियमाणो महिमानं साधनस्य न धनस्य ।
धन्यः कान्तिपुरीस्थः सुब्बा कृष्ण प्रसाद लंसालः

संवत् २०१३ चैत्री पूर्णिमा
पाल्पा नेपाल

पं० माधवप्रसाद देवकोटा
(शास्त्री, विद्याभूषण, विद्वन्मणि):

षट्चक्रयोगमार्गं जिगमिषतां दीपिकासदृशीं ।
स्तुतिरियमुद्दीपयति प्रगाढभक्तिं पराम्बायाः ॥

२०१३ । ६ । २५
राजकीयसंस्कृत महाविद्यालय
नेपाल

इत्यभिनन्दयति—
पं० सोमनाथ शर्मा
(गो० द० वा० प्रिन्सिपल)

परमातुः कौलीयां वरिवस्यां परिचिचीषद्भिः ।
योगाभ्यासतरङ्गे मानसहंसः समोदमुपनेयः ॥

२०१३ । ६ । २७
संस्कृतप्रधानपाठशाला
नेपाल

इति सभाजयति—
पं० रोहिणी प्रसाद शर्मा
(व्याकरणाचार्यः)

नानायोगागमे धीरः कृतभूरिपरिश्रमः ।
लंसालवंशालङ्कारः सुब्बा कृष्णप्रसादकः ॥

(१)

षट्चक्रज्ञानरत्नस्य मञ्जूषायास्तु कुञ्चिकाम् ।
व्यतनोदिति मनुते हेमनाथविचक्षणः ॥

(२)

२०१३ । ११ । १६ । ४
संस्कृतप्रधानपाठशाला
नेपाल

इति मनयति—
पं० हेमनाथ शर्मा
(व्याकरणाचार्य)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



आदौ मूलोज्जमध्ये कुलपथविमलां तारिणीं योगमूर्तिं
षट्पत्रेभौवनेशीं प्रकृतिमयतनुं जापिसिद्धिप्रदात्रीम् ।
नाभ्यब्जे भक्तिगम्यां स्थितिपथकुशलां दक्षिणां कालिकाम्बां
हृत्पद्मे कर्मनिष्ठां कुजकुलजननीमैहिके सिद्धिरूपाम् ॥
कण्ठे योगेन गम्यां दशवदनयुतां गुह्यकालीमनाख्यां
भ्रूमध्ये राज्यदात्रीं त्रिपुरहरवधूं बालिकां ज्ञानमुद्राम् ।
श्वेताब्जे बुद्धिगम्यां परशिवजननीं सच्चिदानन्दविद्यां
निर्लेपां निर्विकारां ख-ल-य-व-र परां तां भजे ब्रह्मरूपाम् ॥

लेखकः —

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विमर्शानन्दितां नित्यां प्रकाशानन्दितं परम् ॥
तयोरानन्दयोरैक्यं सामरस्य परायणम् ॥ १ ॥
निरञ्जनं निराकारं (भासं) विसर्गादधिकं परम् ॥
उन्मनीतिसमाख्यातं कलां सप्तदशीं विदुः ॥ २ ॥

लेखकः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीगुरुगणेशाय नमः ॥

अथ

योगाऽभ्यास-तरङ्गः

प्रारभ्यते

वाणी—विभूति—कमला—परिनिर्मिताङ्गीं,
श्वेताऽरुणाऽरुणसिताऽश्रित—देहरागाम् ।
इष्टस्वरूप—कुलकुण्डलिनीमगम्यां
स्वात्मप्रबोधनिलयां शरणं श्रयामि ॥

(१)

आधारपङ्कजचतुर्दल—कर्णिकान्त—
र्वर्णोल्लसद्दल—विभूषित—पङ्कजं यत् ।
तत्कर्णिकोपरि सिताऽरुणमिश्रवर्णा
इच्छाक्रिया विमलबोधमयास्त्रिरेखाः ॥

(२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताभिर्विनिर्मित—हलक्षयुतं त्रिकोणं
ग्रन्थित्रयग्रथितमक्षर—विन्दुभूषम् ।
विन्द्वन्तरुद्दिलसितं रतिराजबीजं
चन्द्रार्द्धनाद — परिनिर्मितलिङ्गरूपम् ॥

(३)

र्ल्लङ्गवेष्टनपरा भुजगी प्रसुप्ता
सार्धत्रयाभिवलया च तडित्प्रकाशा ।
आवर्त्तवर्णतनुका ह्यकथात्रिवृत्ता
चाधोमुखी स्फुटहलक्षयुतार्द्धवृत्ता ॥

(४)

हूङ्कारनादमुदिताप्रलयप्रबुद्धा
विद्युल्लता विमलतन्तुसमा मनोज्ञा ।
सत्त्वादिसारवदना हुतभुक्स्वरूपा
मेर्वन्तरे स्फुरति कुण्डलिनी सुषुम्णा

(५)

नाड्यौ च रक्तविशदे अथ मेरुबाह्ये
इन्दोरिडा दिनकृतः खलु पिङ्गलाऽख्या ।
मेढ्रादधोविलसिता शुभचित्रिणी सा—
वह्निर्विकूजति गुदोपरि वज्रकन्दे

(६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्या मुखेऽस्ति ननु दीपशिखेव दीप्ता
सच्चिन्मयी स्मरमयी तनुशब्दजाता ।
ब्रह्माऽख्यनामगणिता त्रिगुणात्मभूता
नाडी परा विविधकामकलासमष्टिः ॥

(७)

इत्थं विचार्य सकलेन्द्रियबुद्धिचित्तं
सम्यङ् नियम्य गतरागविरागमानाः ।
कूर्चाऽग्निना मुकुलकुण्डलिनीं प्रबोध्य
योगीश्वराः कुलपथं परिशीलयन्ति ॥

(८)

एवं प्रबोध्य कुलकुण्डलिनीं सुदीर्घ्वं
चानीयतां वशषसोदितवेदपत्रम् ।
संतप्त काञ्चननिभं धरणीस्वतत्त्व-
माधारपङ्कजमिदं प्रवदन्ति वेदाः ॥

(९)

तत्कर्णिकास्थमथ पीतरुचिं चतुष्कं
मध्ये नवीनरवितुल्यतपत्त्रिकोणम् ।
तत्कन्दकोपरि विभूषितदिव्यमूर्त्ते-
र्भूमेः स्वबीजममलं गजराजरूढम् ॥

(१०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैव लोहिततनुं नयनत्रयाऽढ्यं
पाशाऽङ्कुशाऽभयवरान्वितपाणिपद्मम् ।
हस्त्याननं विविधभूषणभूषिताङ्गं
कान्तर्द्धिसिद्धिसहितं गणनाथमीडे ॥

(११)

तत्रस्थितां त्रिनयनामरुणाऽऽस्यपद्मां
खट्वाङ्गचर्म—नरपात्रक—शूलहस्ताम् ।
बन्दे कलाऽतिकुशलां पशुपाशहन्त्रीं
श्रीडाकिनीं त्वगधिपां प्रियपायसान्नाम् ॥

(१२)

भिन्दन्ति मूलकमलस्य बिलं नरा ये
ते प्राप्नुवन्ति हि तनौ शिथिलत्वमादौ ।
शब्दाऽऽदिदिक्षु भवतीह विलीनभावो
विद्यासु तस्य पटुता गदतश्च मुक्तिः ॥

(१३)

एतद्विदार्य मनसा ध्वजमूलदेशे
बन्धूकपुष्परुचिषड्दलपद्ममन्यत् ।
धेन्वादिलान्तलिपिनिर्मितमग्नितत्वाऽ-
धिष्ठानचक्रमनिशं मुनयो वदन्ति ॥

(१४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शीतं सुधांशुधवलं विततप्रकाशं
तत्कर्णिकोपरि विराजितमर्द्धचन्द्रम्
मध्ये प्रदीप्ततनु पावक बीजराजं
मेषाऽधिरुढमरुणाऽरुणरागपूरम् ॥

(१५)

तस्मिन् सुरक्तवसनं चतुराऽऽस्यपद्मं
विद्याघटस्रगभयानि करैर्दधानम् ।
हंसासनं कुजनिभं धृतशैशवश्च
सावित्रिकासहितमात्मभुवं श्रयामि ॥

(१६)

तत्रैव शूलकमलं डमरूञ्च मालां
संविभ्रतीं मदयुतां कुटिलास्यदंष्ट्राम् ।
रक्ताधिपां त्रिनयनां प्रणतोऽस्मि कालीं
शाल्यन्नसारमुदितामपि राकिनीं ताम् ॥

(१७)

इत्थं विचिन्त्य रसपत्रकरक्तपद्मं
भिन्दन्ति ये सुविवरं मनसा क्रमेण ।
लीना भवन्ति खलु पञ्चदशैव दोषाः
शास्त्रार्थबोधकुशलत्वमुदेति तेषाम् ॥

(१८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्योर्ध्वगं दशदलं गगनाऽब्जभासं
गुल्फाऽऽदिफाऽन्तलसिताम्बुजराजमन्यत् ।
नाभिस्थलेऽतिलसितं जलतत्त्वचक्रं
यद्गीयते च मुनिभिर्मणिपूरकाऽऽख्यम् ॥

(१९)

तत्कन्दकोपरि नवोदितभानुबिम्ब-
रक्तं त्रिकोणमतिदीप्तिविराजमानम् ।
मध्ये समुल्लसति पूर्णसुधांशुवर्णं
वह्निबीजममलं मकराऽधिरूढम् ॥

(२०)

तस्यान्तरे विलसितं रमया समेतं
पीताम्बरं प्रथमयौवननीलदेहम् ।
शङ्खाऽऽदिकाऽऽयुधधरं जलमण्डलस्थं
श्रीवत्सकौस्तुभधरं हरिमाश्रयामि ॥

(२१)

श्यामां च घोरवदनां त्रिमुखीं त्रिनेत्रां
वज्राऽभये वरदशक्तियुगं दधानाम् ।
पीताम्बरामनुभजे मणिपूरसंस्थां
मांसाऽधिपां प्रियगुडान्नक-लाकिनीं ताम् ॥

(२२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यो वै भिनत्ति मणिपूरविचित्रचक्रं
प्राप्नोति बोधसहितां स वचोविभूतिम् ।
भूमिं विसृज्य च तथोर्ध्वगतिं प्रयाति
पातालसिद्धिमुपयन् मदतश्चमुक्तिम् ॥

(२३)

हरिद्वर्णं रविदलाऽन्वितपीतवर्णं
ब्रह्माऽऽदिठाऽन्तलिपिसंयुतवायुतत्त्वम् ।
ब्रह्मात्मकाऽद्भुतनिनादविभावनेन
विज्ञा अनाहतमिदं प्रवदन्ति चक्रम् ॥

(२४)

तत्कर्णिकोपरि विमण्डितमङ्गकोणं
धूमावलीसदृशधूसरकान्तिपूरम् ।
मध्येऽतिधूसरमृगोपरि राजमानं
धूमोपमं पवनबीजमिहाऽस्ति तत्त्वम् ॥

(२५)

भस्माङ्गरागपरिशोभितसर्वभूषं
टङ्काऽभये मृगवरौ दधतं च सेन्दुम् ।
व्याघ्राम्बरं शशिनिभं गतयौवनञ्च
रुद्रं भजे तदुपरिस्थमुमासमेतम् ॥

(२६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रस्थितां त्रिनयनां कपिलाऽऽस्यपद्मां
मत्तां वराऽभयकपालसुपाशहस्ताम् ।
दध्यन्नभक्षणपरां करुणाऽर्द्रचित्तां
मेदोधिपामनुभजे हृदि काकिनीं ताम् ॥

(२७)

हृत्पङ्कजं स्मरति यः शिवधामभूतो
ध्यानावधाननिरतोऽक्षजयी दृढात्मा ।
सोऽयं प्रवाहयति वाङ्मयदिव्यधारां
दिव्यस्वरूपलसितो विबुधैः प्रणम्यः ॥

(२८)

तस्योर्ध्वतोऽस्ति कमलं शुभकण्ठमूले
सर्वैः स्वरैः सुरुचिषोडशपत्रपूर्णम् ।
धूमोपमं गगनतत्त्वमिति प्रसिद्धं
यद्योगिभिर्निगदितश्च विशुद्धचक्रम् ॥

(२९)

तत्कर्णिकोपरि विशुद्धमतीव शुभ्रं
पूर्णेन्दुवद्गगनमण्डलमस्ति गोलम् ।
मध्ये हिमाद्रिशिखरोपमकान्तिपूर्णं
बीजं शिवस्य तुहिनांशुगजाऽधिरूढम् ॥

(३०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्राऽग्निवत्स्फुरितवर्तिं शिखास्वरूप-
मङ्गुष्ठमानकमनामयनिर्विकारम् ।
जीवात्मसंज्ञकशिवंस्थितिसारमीडे
प्राणेश्वरीसहितमेकमनन्तदेहम् ॥

(३१)

मुद्गान्नभक्षणपरांस्फुटवञ्चवक्त्रां
पाशाऽङ्कुशेषुधनुरीड्यकरां त्रिनेत्राम् ।
ज्योतिःस्वरूपनिलयां निहितां विशुद्धे
श्रीशाकिनीमनुभजेऽस्थ्यधिपां प्रमत्ताम् ॥

(३२)

इत्थं कलादलविलक्षितपद्मराजं
यश्चिन्तयेदविरतं मनसा क्रमेण ।
वाग्मी कविर्भवति योगविचारशीलो
जीवत्यसौ बहुदिनानि जितत्रिकालः ॥

(३३)

विद्युन्निभं तदुपरि द्विदलं सरोजं
हत्वाऽक्षरं लसितनिष्कलशून्यतत्त्वम् ।
भ्रूमध्यगं विविधराजसयोगमूल-
माज्ञाऽऽख्यचक्रमिति योगिजना वदन्ति ॥

(३४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कर्णिकोपरि लसत्त्रिगुणोपमेयं
रक्तत्रिकोणमथ हंसविराजमानम् ।
तत्पीठगं त्रिगुणवर्तिमनन्तरूपं
ज्योतिस्त्रिरूपममलं प्रणवं प्रणौमि ॥

(३५)

तत्र स्थितं विपुलभायुतमव्ययञ्च
नित्यं निरञ्जननिरामयनिर्विकारम् ।
विद्याऽऽख्यशक्तिसहितं परमात्मदेवं
व्याप्तं जरामरणरागविमुक्तमीडे ॥

(३६)

मुद्राधनुर्डमरुपुस्तकपात्रमालाः
संबिभ्रतीं त्रिनयनामरुणां रसाऽऽस्याम् ।
पीताशनां विशदपद्मगतां तदङ्के
मज्जाधिपामनुभजे सितहाकिनीं ताम् ॥

(३७)

यो वै भिनत्ति कुहरं सकलार्थतत्त्व-
माज्ञाऽऽख्यचक्रमिह पूर्वकृतं स वेत्ति ।
कालप्रबञ्चक इहाद्यचक्रवर्त्ती
सृष्ट्यादिकार्यकुशलः कृतदिव्यदृष्टिः ॥

(३८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल्पान्तलक्षितगुणत्रयसूक्ष्ममूर्ते-
बीजत्रयप्रणयितप्रणवस्य धाम्नः ॥
शृङ्गेषु तस्य रुचिरेषु मनोज्ञरूपा
राजन्ति पद्मजगदाधरनीलकण्ठाः ॥

(३९)

तस्योर्ध्वतोऽस्ति सितकान्तिविभासमानो
विन्दुर्द्धचन्द्रपरिमण्डितनाद आद्यः ।
तत्त्व महद्द्रवितरूपमिहाऽस्तिनादे
तच्चक्रमण्डितलयोद्भवमीशमीडे ॥

(४०)

तत्रोर्ध्वलिङ्गपरिभूषितविन्दुसंज्ञं
सृष्ट्यादिपालनलयान्तकसारभूतम् ।
मायाप्रपञ्चमयसूक्ष्मचक्रराजं
तेजोऽमलं प्रणवरूपमिहाश्रयामि ॥

(४१)

नादोदिताः प्रमुदिताखिलतत्त्वमूर्त्तेः
सानुग्रहाः परकलाः सकलाः शिवस्य ।
कारुण्यपूर्णमथ तत्र समाधिदीप्तं
ज्योतिर्मयं परशिवं शिरसा नमामि ॥

(४२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बिन्दूत्थनादपरिभूषितचक्रमेत-
द्योवै भिनत्ति गुरुगम्यमगम्यमन्यैः ।
वाक्सिद्धिमश्नुति स पश्यति दिव्यलोकं
सङ्कल्पजालविमुखो जडवत्स्वदेहः ॥

(४३)

बिन्दूर्ध्वगं विशदचन्द्रमरीचिगौर-
मर्द्धाङ्गलोहितरुचिं करुणारसार्द्रम् ।
नक्षत्रहारपरिभूषितमाद्यमर्द्ध-
नारीश्वरं शिवपदं निदधामि मूर्द्धिन् ॥

(४४)

तस्योर्ध्वदेशगमधोमुखमीशवासं
सम्पूर्णवर्णपरिपूर्णसहस्रपर्णम् ।
कर्पूखण्डधवलं रविचन्द्रवह्नि-
ज्योतिर्मनोहरसहस्रदलाऽब्जचक्रम् ॥

(४५)

तत्कर्णिकान्तरगतं रविपत्रगण्यं
कूटाक्षरैर्विलसितं विकचं विशुद्धम् ।
ज्योतिर्मयं कमलमन्यदतीव शुभ्रं
कन्देस्फुरत्त्रिगुणवर्त्तिमहत्त्रिकोणम् ॥

(४६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रार्धनादपरिभूषितविद्युदाभं
निष्कैवलं प्रणवमुद्धृतकोणमध्ये ।
ब्रह्मादिरूप्यचक्रगदितं गुरुतत्त्वमन्य-
न्माणिक्यरत्नखचितंमणिपीठ माहुः ॥

(४७)

ओङ्कारबिन्दुगतमीशमनाद्यनन्त-
मानन्दलक्षणयुतं विभुमव्ययोक्तम् ।
ज्योतिर्मयं विमलचेतनसत्यरूपं
साम्बं शिवं शिवकृते परमं स्मरामि ॥

(४८)

सर्वायुधैर्विलसितां वरपाणिपद्मां
वीर्याधिपां विविधवर्णमयीमनन्ताम् ।
सर्वान्नभक्षणरतां विरलां समष्टिं
श्रीयाकिनीमनुभजे मुदितां सहस्रे ॥

(४९)

ज्योतिर्मयं प्रणवबिन्दुबिले स्फुरन्त-
मर्द्धोदितं दिवसनाथमिवोर्द्धरक्तम् ।
अर्द्धाङ्गशारदसुधांशुमरीचिगौरं
प्रासादबीजमुदितं शिवशक्तिरूपम् ॥

(५०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रान्तरे विलसितं धवलोपचारैः
सम्पूजितं वरतनुं वरदाऽभयं च ।
संबिभ्रतं स्मितमुखं ननु वामभागे
शक्त्यायुतं शशिनिभं गुरुमाश्रयामि ॥

(५१)

पश्यन्ति ये च गगनत्रयमिन्दुपत्रं
श्वेताम्बुजं गुरुगिराऽत्र विमुक्तिलोके ।
जन्मादिभूतपुनरागमनादिहीना-
स्ते पुण्यपापरहिता निरुपाधिदेहाः ॥

(५२)

श्रीमद्गुरोः करुणया द्रुतपादपद्म-
पीयूषमुत्तृषितकुण्डलिनीमुखेन ।
आस्वाद्य साधकजनेष्टतनुर्विलोला
लीलाविलासमिह सा विदधाति पद्मे ॥

(५३)

कन्दर्पदर्पदलनामणिपीठिकाया
बिन्दौ त्रिधामसदनोपरि राजमाना ।
ध्येया जवाकुसुमदाडिमपुष्पसारा
सिन्दूरकान्तिपरिपूरितदिव्यवर्णा ॥

(५४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रोद्दीप्तरत्नमुकुटोपरि चन्द्ररेखां
कृष्णाञ्जनच्छविमनोहरमुक्तकेशीम् ।
कस्तूरिकासुषमकेशरसाङ्कभालां
ताम्बूलरागपरिपूर्णशुभोष्ठबिम्बाम् ॥
(५५)

मार्त्तण्डपूर्णविधुमण्डलकुण्डलां तां
ताराऽऽख्यमौक्तिकविभूषिततुङ्गनासाम् ।
ईषद्विकासिकरकोपमचारुदन्तां
बालार्कमण्डलविमोहकगण्डयुग्माम् ॥
(५६)

कालाञ्जनाञ्चितविलोलविशालनेत्रां
भ्रूयुग्मनिर्जितमनोभवपुष्पचापाम् ।
वृत्तानुबिम्बचिबुकां शुभकम्बुकण्ठीं
पीयूषपूर्णकनकाऽद्रिसम-स्तनाऽऽढ्याम् ॥
(५७)

मुक्तासरेण परिचुम्बितकण्ठभागां
रत्नस्रगुल्लसितपुष्पविचित्रमाल्याम् ।
संपुष्टकोमलमृणालमनोज्ञबाहुं
लाक्षारसात्यरुणपाणिचतुष्टयाढ्याम् ॥
(५८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्षेण हस्तयुगलेन विधारयन्तीं
रत्नाङ्कुशं कुसुमजानथ पञ्चबाणान् ।
वामेन पाशयुतमिक्षुधनुर्दधानां
लावण्यधामनिलयं निखिलार्च्चनीयाम् ॥

(५९)

स्तंभार्थमङ्कुशमिषूनपि जृम्भणार्थं
पाशं वशीकरणहेतुकमाददानाम् ।
संमोहनाय धृतकार्मुकपाणिपद्मां
कारुण्यसिन्धुमतिसुन्दरदिव्यशस्त्राम् ॥

(६०)

हस्ताङ्गुलीषु धृतभासुररत्नमुद्रा-
शोभान्वितां सुमणिबन्धगकङ्कणेन ।
केयूरभूषितभुजैर्विजितत्रिलोकां
वक्षस्थयो कनककञ्चुकदीप्यमानाम् ॥

(६१)

सिंहोदरीं कटितटे बहुमूल्यरत्न-
काञ्चीकलापकलितां त्रिवलीललामाम् ।
गम्भीरनाभि सरसीं कनकावदात-
रक्ताभतन्तुमयशाटिकया सुवस्त्राम् ॥

(६२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विस्तीर्णसुन्दरसमुन्नतिमन्नितम्बां
रम्भोरुयुग्मललितां कनकाभजङ्घाम् ।
दिव्याऽतिदिव्यमणिमण्डलदीप्तकान्ति-
ब्रह्माण्डकोल्लसितविश्वविकाशयोनिम् ॥

(३६)

अर्द्धेन्दुमांसलविमोहकजानुयुग्मां
पूगीफलोपमनिगूढसुगुल्फवल्गुम् ।
माङ्गल्यशब्दितमहामणिनूपुराढ्य
लावण्यपूर्णमृदु—कोकनदाभपादाम् ॥

(६४)

संपूजितां सुरवरैर्विविधोपचारैः
संचिन्तितां मुनिगणैः कुलकौलिकाऽम्बाम् ।
योगालये विलसितामगुणा गुणाऽऽढ्यां
संपूर्णवैभववतीं युवतीं नमामि ॥

(६५)

पूर्णेन्द्वलङ्कृतजटापरिपूर्णभूषा-
कामेश्वराङ्कनिलयां श्रितवामदेहाम् ।
राजेश्वरीं भगवतीं त्रिपुरां त्रिनेत्रां
वाक्कायचित्तविभवैरनिशं भजामि ॥

(६६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मेशरुद्रहरिभिर्धृतमञ्चमध्ये
सुप्तस्य नाभिकमलेऽत्र सदाशिवस्य ।
फुल्ले सहस्रदलकेशरपूर्णकोशे
वन्दे स्थितौ त्रिपुरसुन्दरताप्रसिद्धौ ॥

(६७)

इत्थं विचिन्त्य कुलकुण्डलिनीं मनोज्ञां
सूक्ष्माऽतिसूक्ष्मतरकान्तिमतीमगम्याम् ।
चैतन्यपूर्णवपुषं निखिलां निरूपां
व्योमाऽग्निवातधरणी-सलिलस्वरूपाम् ॥

(६८)

आनन्दमग्नपरमामृतपानमुद्रा-
मुद्यानपीठगतयोगपरां कुलज्ञाम् ।
सच्चित्स्वरूपनिलयां सकलार्थतत्त्वां
सूर्याऽग्निचन्द्रकलितत्रिगुणां श्रयामि ॥

(६९)

तारा तथैव भुवना परकालिका च
कुब्जेश्वरी दशशिरोऽङ्कितगुह्यकाली ।
चामुण्डिका त्रिपुरसुन्दर-बालिकाऽसौ
कामेश्वरीति कुलकुण्डलिनीं भजामि ॥

(७०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमद्गुरोः करुणयाऽमृतमापयित्वा
कुब्जेश्वरीं कथितकुण्डलिनीष्टरूपाम् ।
श्रीचक्रमण्डिततनौ पथिकक्रमेण
लोलायमानवदनामवरोहयामि ॥

(७१)

आदौ नमोऽस्तु गुरवे परशम्भवेऽस्मै
देव्यै त्रिलोकतनवे परमाम्बिकायै ।
बिन्द्वादिभूपुरमथान्तरचक्रराजं
संचिन्तयाम्युपरि मूलजभिन्नपद्मे ॥

(७२)

बिन्दूस्वरेन्दुमपरं विमलं त्रिकोण-
मष्टारचक्रमुदितं च दशाग्रयुग्मम् ।
मन्वस्रमष्टदलषोडशपत्रपद्मे
वृत्तत्रयं प्रगणितं धरणी त्रयाऽऽढ्यम् ॥

(७३)

कौलं च शैवमथ शाक्तकवैष्णवे च
सौरं च वैदिकमथापि च साङ्ख्ययोगम् ।
श्रीगाणपत्यमनु बौद्धजितेद्रियौ च
चार्वाकमादिकुलदर्शितचक्रमीडे ॥

(७४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्येयं सहस्रदलपङ्कजकर्णिकान्तः
पूर्वोक्तभानुदलमण्डितपद्ममन्यत् ।
तत्राऽन्तरे विशदलोहितदीप्तसर्वाऽऽ-
दन्दाऽऽख्यबिन्दुमुदितं परबिन्दुचक्रम् ॥

(७५)

तद्बिन्दुकोटरगतां नवयौवनाङ्गीं
सिन्दूरकान्तिरुचिरां बहुरत्नभूषाम् ।
पाशाऽङ्कुशौ शरधनुर्दधतीं त्रिनेत्रां
ब्रह्माऽऽदिमञ्चकगतां ललितां भजामि ॥

(७६)

तद्बिन्दुबाह्यभुवि दाडिमपुष्पवर्णां
पट्टाम्बरां त्रिनयनां शशिशेखराऽऽढ्याम् ।
विद्याऽक्षसूत्रवरदाऽभयपाणिपद्मां
श्रीभैरवीं त्रिपुरपूर्णपदां श्रयामि ॥

(७७)

नादोत्थबिन्दुमयचक्रगतं त्रिकोणं
बालाऽऽतपाऽरुणनिभं विमलं विशालम् ।
स्निग्धं समस्तलिपिभिर्परिनिर्मितञ्च
सर्वार्थसिद्धिदमिदं प्रवदन्ति चक्रम् ॥

(७८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कर्णिकान्तरगतां स्मितचारुवक्त्रां
बालार्कमण्डलनिभां नरमुण्डमाल्याम् ।
दानाऽभयाऽक्षबलयामलपुस्तहस्तां
बन्दे सुभूषणयुतां त्रिपुराम्बिकान्ताम् ॥

(७९)

दीप्तंजवाकुसुमवत्परमप्रकाशं
वाग्देवताभिरुपशोभितमष्टकोणम् ।
सम्पूर्णरोगहरणाऽऽख्यसरोजमन्य-
दष्टारचक्रमुदितंशुभनादचक्रे ॥

(८०)

तन्मध्यगां स्मितमुखीं विशदांम्बराऽऽढ्यां
पाशाऽङ्कुशाऽभयकपालधरां त्रिनेत्राम् ।
नानाविभूषणयुतां शशिमौलिदीप्तां
शुभ्रां भजे भगवतीं त्रिपुराऽऽदिसिद्धाम् ।

(८१)

अर्द्धोदितार्कमिव लोहितपुञ्जवर्ण—
मन्तर्दशारमुदितं शुभदं वरेण्य ।
आज्ञाऽऽख्यपङ्कजगतंदशकोणचक्रं
सर्वार्थरक्षणकरंपरिचिन्तयामि ॥

(८२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कर्णिकोपरि गतां नयनत्रयाऽऽढ्यां
पाशाऽङ्कुशाऽभयकपालवराऽञ्चमालां ।
संविभ्रतीं स्मितमुखीं मणिमण्डिताङ्गीं
रक्तां भजे त्रिपुरमालिनिकामगम्याम् ॥

(८३)

ध्येयंजवाकुसुमगर्वितरागभृत—
मारक्तरञ्जितबहिर्दशकोणचक्रम् ।
गीतं सदा मुनिगणैर्ननु कौलवर्य्यैः
सर्वार्थसाध नमिदं निहितं विशुद्धे ॥

तत्र स्थितां त्रिनयनां तचारुवक्त्रां
विद्यावराऽभयजपाऽञ्चवटीर्दधानाम् ।
नानाविभूषणधरां शरदिन्दुशुभ्रां
वन्देऽर्धचन्द्रविलसत्त्रिपुरां श्रियं ताम् ॥

(८५)

नित्योत्सवं विविधमङ्गलकार्यवर्यं
सिन्दूररागपरिपूरितरक्तवर्णम् ।
सौभाग्यदायकचतुर्दशकोणचक्र
ज्ञेयं विराजितमनाहतकर्णिकायाम् ॥

(८६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्ये स्थितां त्रिनयनामतिलोहिताङ्गीं
सौवर्णरत्नखचितां कुटिलेन्दुमौलिम् ।
विद्याऽभयाऽक्षवलयेष्टकरां प्रसन्नां
त्वामीश्वरि ! त्रिपुरवासिनि ! चिन्तयामि ॥

(८७)

मार्तण्डतुल्यमतिसुन्दरशुभ्रवर्णं
ज्योतिर्मयं वसुदलान्वितचक्रराजम् ।
संक्षोभणाऽऽख्यमुदितं मृदुलं प्रफुल्लं
कन्दोपरि स्थितमिदं मणिपूरचक्रे ॥

(८८)

तत्कर्णिकोपरि सुपुस्तकमक्षसूत्रं
दानाऽभये विदधतीं नयनत्रयाऽऽढ्याम् ।
सिन्दूरकान्तिलसितां मणिभूषिताङ्गीं
स्मेराननां त्रिपुरसुन्दरिकां भजामि ॥

(८९)

पीयूषतुल्यममलं शरदिन्दुशुभ्रं
पूर्णेन्दुवद्विमल षोडशपत्रपूर्णम् ।
वाञ्छाप्रसिद्धिदमिदं कुमुदं पुटे स्वाऽ-
धिष्ठानकस्य निहितं च विचिन्तनीयम् ॥

(९०)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रोपगां त्रिनयनां विशदप्रकाशां
श्वेताम्बरां स्मितमुखीं विधुभूषिताङ्गीम् ।
पाशाऽङ्कुशाऽभयवरान्वितवेदहस्तां
वन्दे श्रिया युततनुं त्रिपुरेश्वरीं ताम् ॥

(९१)

मूलोर्ध्वगं रसदलाऽधरलिङ्गमूले
श्वेताऽरुणाऽसितनिभं खलु गोलरूपम् ।
वृत्तत्रयेण परिभूषितचक्रमेतत्
त्रैवर्ग्यसाधनकरं त्रिगुणत्वमाहुः ॥

(९२)

तत्कर्णिकामधि च दाडिमपुष्पवर्णां
रक्ताम्बरां त्रिनयनां रुचिराङ्गभूषाम् ।
विद्याऽक्षसूत्रवरदाऽभयपाणिपद्मां
सेन्द्रं स्मरामि सततं त्रिपुरेशिकां ताम् ॥

(९३)

उद्यत्सहस्रविमण्डलवत्प्रदीप्तं
ज्ञेयं चतुर्मुखयुतं सुकुमारचक्रम् ।
त्रैलोक्यमोहनकरं सदनत्रयाऽऽढ्यं
मूलाऽऽख्यचारुकमलोपरि शोभमानम् ॥

(९४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उद्यत्सुधांशुधवलां धवलाम्बराऽऽढ्यां
रत्नोज्ज्वलां त्रिनयनां शशिशेखरेद्धाम् ।
विद्याऽक्षसूत्रकमलद्वययुक्तहस्तां
भूयस्त्रयोपरि गतां त्रिपुरां भजामि ॥

(९५)

मूलादधोगतमहाकमलस्यकन्दे
श्रीमन्त्रिकोणमधिकाद्भुतशक्तिशक्तम् ।
तत्कर्णिकोपरि गतं शुभबिन्दुमध्ये
निष्कैवलं प्रणवराजममोघमीडे ॥

(९६)

तन्नादबिन्दुगतशुभ्रतनुंद्विबाहुं
श्वेताम्बरं धवलपुष्पविभूषिताङ्गम् ।
शुभं शिवकरं विधुवत्प्रकाशं
वन्दे गुरोः करुणया विदिताऽऽत्मदेवम् ॥

(९७)

पीत्वा पराऽमृतरसं मदमत्तभावं
चाऽधोगतिं परमकुण्डलिनीमपूर्वाम् ।
तत्र स्वयम्भवमहेशशिरोधिवासा-
मानन्दसिन्धुमबलां शरणं प्रपद्ये ॥

(९८)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मूलाब्जके च विमले मणिपूरमध्ये
धूम्रे कलादलविलक्षितकण्ठपद्मे ।
ग्रन्थीर्विरिञ्चिगरुडध्वजशम्भुरूपा
भित्वा क्रमेण शिवतां प्रभजन्ति कौलाः ॥

(९९)

छन्दःस्वरध्वनिमनुक्रमगद्यपद्य-
रागाऽऽदितालललयवर्णपदाऽऽदिकानि ।
यावन्ति सन्ति भुवने किल वाङ्मयानि
भूतानि तानि कुलकुण्डलिनीस्वरूपात् ॥

(१००)

वाच्या त्वमेव वचनं किल वाचिका च
कर्ता च कारणकृताऽकृतकर्मरूपा ।
स्तोता स्तुता स्तुतिरपि त्रितयं त्वमेव
किं वर्ण्यते नु महिमा कुलकुण्डलिन्याः ॥

(१०१)

विद्याश्रुतिस्मृतिकुलाऽकुलतन्त्रमार्ग-
ज्ञानं जपो विविधभक्तिकधारणाऽऽदि ।
साध्यश्च साधक उभौ परसाधनञ्च
षट्त्रिंशतत्त्वमपि कुण्डलिनीस्वरूपम् ॥

(१०२)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्योतिर्मयं सगुणनिर्गुणतत्त्वसारं
नित्याकलाभ्युदितपञ्चदशादिभेदम् ।
धामत्रयोपरि गतं त्रिपुटं त्रिमूर्त्ति
सौदामिनीमयतनुं प्रभजे त्रिकूटम् ॥

(१०३)

संचिन्त्य चात्मनि कुलाऽकुलयोनिपीठं
बिन्दुं मुखे तदनु वाह्यगबिन्दुयुग्मम् ।
एवं त्रिबिन्दुमयकामकलास्वरुप
कौलाः स्मरन्ति कुलमार्ग समाधियोगे ॥

(१०४)

उर्द्धं सहस्रदलमण्डितपद्मरन्ध्रे ।
चिन्त्यं पराऽऽख्यमनुबीजमुदारशुभ्रम् ।
मूलेऽनुबिम्बितमदःकमले सुमेरोः
प्रासादबीजमरुणं स्मरणीयमत्र ॥

(१०५)

उच्चैरधः स्फुटितसूक्ष्मतरप्रसाद-
मन्त्रौ, तयोर्विकटघर्षणजाऽमृतेन ।
संसिच्यमानमनिशं स्ववपुर्विभाव्य
योगालये स रमते कुल-चक्रवर्त्ती ॥

(१०६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डं च शक्तिरुदिता कुलकुण्डलिन्या
हंसः पदं प्रकथितोऽत्र शिवोऽन्तरात्मा ।
बिन्दुः स्वरूपमलं ननु भावलक्ष्यं
रूपादतीतमुदितं शिवसामरस्यम् ॥

(१०७)

रूपं च हंसपदपिण्डयुतं स्वरूपं
ज्ञेयं साद सगुणबन्धनमादिहेतुम् ।
रूपाण्यतीतमतिनिर्गुणभावमस्या
यो वेत्ति ना परमयोगमिमं स मुक्तः ॥

(१०८)

ज्ञात्वैवं गुरुवक्त्रपद्मकुहराद्योगस्य मार्गं क्रमात्
चक्राणां विविधाभिधार्थनियमिनः सङ्केतविद्यामपि ।
येऽभ्यस्यन्ति सदा दृढेन मनसा चक्राणि भित्वा क्रमात्
ते तत्सिद्धिमवाप्नुवन्ति शुभदामिष्टाङ्गिनीं कुण्डलीम् ॥

(१०९)

ॐ तत्सत् ॐ

इतिश्रीकृष्णप्रसाद शर्मलंसालेन विरचितो
योगाऽभ्यासतरङ्गः समाप्तः ॥

॥ शुभम् ॥

। श्रीरस्तु ।

ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(9)

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दी इउरेका प्रिन्टिग वर्क्स (प्रा० लि०,
रेतीचौक, गोरखपुर।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu